# ॥ वैयाकरणसिद्धान्तकौमुदी ॥

## संज्ञाप्रकरणम् (८)

३०.०७.२०१०

# पुनरावर्तनम्

- सवर्णसंज्ञा,
- सवर्णनिषेधः,
- सवर्णग्रहणम्

- अतो भिस ऐस् – अकारान्तात् परस्य भिस् प्रत्ययस्य ऐस् आदेशः स्यात् ।
- राम भिस् विश्वपा भिस्?
- राम ऐस् विश्वपाभिः
- रामैस्
- रामैः

- ऋतो ङिसर्वनामस्थानयोः – ऋकारान्तस्य प्रातिपदिकस्य गुणः विधीयते । ह्रस्व-ऋकारान्तस्यैव भवति, न तु दीर्घस्य ।
-

# १५. तपरस्तत्कालस्य (१.१.७०)

- पदद्वयम् । तपरः, (तपरः), तत्कालस्य । तपरः इति आवर्तते । अण् इति अनुवर्तते (अणुदित् सवर्णस्य चाप्रत्ययः) ।
- तः परः यस्मात् सः, तात्परश्च उच्चार्यमाणसमकालस्यैव संज्ञा स्यात् ।
- X+त् – तः परः यस्मात् सः तपरः ।
- त्+X – तात् परः तपरः ।
- तत्कालः = तस्य (=उच्चार्यमाणस्य) कालः इव कालः यस्य सः ।
- इदं नियमसूत्रम् । 'अणुदित् सवर्णस्य चाप्रत्ययः' इत्यनेन सर्वेषां सवर्णानां ग्रहणे प्राप्ते, तपरश्चेत् तत्कालानां सवर्णानामेव ग्रहणं भवति इति नियम्यते ।

- तेन अत्, इत्, इत्यादयः षण्णां षण्णां संज्ञाः । ऋत् इति द्वादशानाम् ।
- अत् = अ॒, अँ॒, अ, अँ, अ॑, अँ॑

# १६. वृद्धिरादैच् (१.१.१)

- पदद्वयम् । वृद्धिः, आ-द्-ऐच् ।
- आदैच्च वृद्धिसंज्ञः स्यात् ।
- आ त् ऐच् – तात् परः तपरः । तस्माद् दीर्घयोरेव ऐकार-औकारयोः वृद्धिसंज्ञा, न तु प्लुतयोः।
- फलितार्थः – दीर्घ-आकारस्य, दीर्घ-ऐकारस्य, दीर्घ-औकारस्य च 'वृद्धिः' इति संज्ञा व्याकरणशास्त्रे ।
- वृद्धिः – सूत्रकारकृतं मङ्गलम् ।
- वृद्धिसंज्ञाश्रितानि कार्याणि – वृद्धिरेचि, मृजेर्वृद्धिः ।

# १७. अदेङ् गुणः (१.१.२)

- पदद्वयम् । अ-द्-एङ्, गुणः ।
- अदेङ् च गुणसंज्ञः स्यात् ।
- अ त् एङ्
- तः परः यस्मात् सः तात्परः
- ह्रस्वस्य अकारस्य, दीर्घयोः एकार-ओकारयोः शास्त्रे 'गुणः' इति संज्ञा ।
- 
- गुणसंज्ञाश्रितानि कार्याणि – आद्गुणः, मिदेर्गुणः ।

# १८. भूवादयो धातवः (१.३.१)

- पदद्वयम् । भू-वा-आदयः, धातवः ।
- क्रियवाचिनः भ्वादयः धातुसंज्ञाः स्युः ।
- वा – वाति इत्यत्र क्रियावाची (वा गतिगन्धनयोः) । करोषि, न वा? इत्यत्र विकल्पवाची ।
- क्रियावाचिनः एव धातुसंज्ञा ।
- हिरुक् वर्जने – भ्वादिगणपठितत्वं नास्ति । अतः क्रियावचनत्वेऽपि न धातुसंज्ञा ।
- धातुसंज्ञाश्रितानि कार्याणि – आतो धातोः, धातोः कर्मणः समानकर्तृकादिच्छायां वा ।

# १९. प्राग्रीश्वरान्निपाताः (१.४.५६)

- पदत्रयम् । प्राक्, रीश्वरात्, निपाताः ।
- इत्यधिकृत्य ।
- 'निपाताः' इति संज्ञा अधिक्रियते । 'अधिरीश्वरे' (१.४.९७) इत्येतत्पर्यन्तम् ।

# २०. चादयोऽसत्त्वे (१.४.५७)

- पदद्वयम् । च-आदयः, असत्त्वे ।
- अद्रव्यार्थाः चादयः निपातसंज्ञाः स्युः ।

चादयः – च, वा, ह, अह, एव, एवम्, नूनम्, शश्वत्, युगपत्, भूयस्, सूपत्, कूपत्, कुवित्, नेत्, चेत्, चण, कच्चित्, यत्र, तत्र, नह, हन्त, माकिम्, माकीम्, माकिर्, नकिम्, नकीम्, नकिर्, आकीम्, माङ्, नञ्, तावत्, यावत्, त्वा, त्वै, द्वै, न्वै, रै, श्रौषट्, वौषट्, स्वाहा, स्वधा, ओम्, तथा, तथाहि, खलु, किल, अथ, सुष्ठु, स्म, अ, इ, उ, ऋ, ऌ, ए, ऐ, ओ, औ, आदह, उञ्, उकञ्, वेलायाम्, मात्रायाम्, यथा, यत्, तत्, किम्, पुरा, बधा, धिक्, हाहा, हेहै, पाट्, प्याट्, आहो, उताहो, हो, अहो, ना, अथो, ननु, मन्ये, मिथ्या, असि, ब्रूहि, तु, नु, इति, इव, वत्, वात्, वन, बत, सनुकम्, छंवट्, शङ्के, शुकम्, खम्, सनात्, सनतर्, नहिकम्, सत्यम्,

ऋतम्, अद्धा, इद्धा, नोचेत्, नचेत्, नहि, जातु, कथम्, कुतः, कुत्र, अव, अनु, हा, हे, आहोस्वित्, शाम्, कम्, खम्, दिष्ट्या, पशु, नट्, सह, आनुषट्, अङ्ग, फट्, ताजक्, भाजक्, अये, अरे, वाट्, कुम्, खुम्, घुम्, अम्, ईम्, सीम्, सिम्, सि, वै ।

- अद्रव्यार्थाः – लिङ्गसंख्यान्वितं द्रव्यम् ।
- शुकं गच्छति = शीघ्रं गच्छति । निपातसंज्ञा भवति ।
- शुकं पश्य = पक्षिविशेषं पश्य । निपातसंज्ञा न भवति ।
-
- पशुं नयन्ति = प्राणिविशेषं नयन्ति । निपातसंज्ञा न भवति ।
- पुष्टं पशु मन्यते = सम्यगित्यर्थः । निपातसंज्ञा भवति ।
-
- निपातसंज्ञाश्रितानि कार्याणि – स्वरादिनिपातमव्ययम्, निपात एकाजनाङ् ।

# २१. प्रादयः (१.४.५८)

- एकं पदम् । प्र-आदयः । असत्त्वे इत्यनुवर्तते (चादयोऽसत्त्वे)। निपाताः इति अधिक्रियते ।
- अद्रव्यार्थाः प्रादयस्तथा । (निपातसंज्ञाः स्युः इत्यर्थः) ।

# २२. उपसर्गाः क्रियायोगे (१.४.५९)

- प्रादयः इति अनुवर्तते । निपाताः इति अधिक्रियते ।
- २३. गतिश्च (१.४.६०) – प्रादयः इति अनुवर्तते । निपाताः इति अधिक्रियते ।
- प्रादयः क्रियायोगे उपसर्गसंज्ञाः गतिसंज्ञाश्च स्युः ।
- उपसर्गसंज्ञाश्रितानि कार्याणि – उपसर्गादसमासेऽपि णोपदेशस्य, उपसर्गस्यायतौ ।
- गतिसंज्ञाश्रितानि कार्याणि – गतिकारकोपपदात् कृत्, गतिरनन्तरः ।
- प्र, परा, अप, सम्, अनु, अव, निस्, निर्, दुस्, दुर्, वि, आङ्, नि, अधि, अपि, अति, सु, उत्, अभि, प्रति, परि, उप – एते प्रादयः ।

# २४. न वेति विभाषा (१.१.४४)

- चत्वारि पदानि । न, वा, इति, विभाषा ।
- निषेध-विकल्पयोः विभाषा संज्ञा स्यात् ।
- 
- पाणिनीयशास्त्रे वा, विभाषा, अन्यतरस्याम्, बहुलम् – इत्येते शब्दाः विकल्पार्थकाः उपयुज्यन्ते ।

# २५. स्वं रूपं शब्दस्याशब्दसंज्ञा (१.१.६८)

- चत्वारि पदानि । स्वम्, रूपम्, शब्दस्य, अशब्दसंज्ञा ।
- शब्दस्य स्वं रूपं संज्ञि, शब्दशास्त्रे या संज्ञा तां विना ।
- लोके सर्वदा अर्थस्यैव प्राधान्यम् । गाम् आनय इत्युक्ते गोरूपपदार्थः पशुविशेषः आनीयते, न तु 'गो' इति शब्दः । धेनुमानय इत्युक्तेऽपि स एव पदार्थः आनीयते ।

- किन्तु व्याकरणशास्त्रे शब्दस्य प्राधान्यम् । 'अग्नेर्ढक्' इत्युक्ते 'अग्नि' इति शब्दस्य ढक् प्रत्ययः क्रियते, न तु अग्निपदार्थस्य । किञ्च, अग्निशब्दस्य विहितं कार्यम् 'अ ग् न् इ' इति आनुपूर्व्याः एव भवति, न तु वह्निशब्दस्य, न वा अनलशब्दस्य ।

- शब्दसंज्ञा – व्याकरणशास्त्रे उपयुक्ताः वृद्धि-गुणादिसंज्ञाः ।
- शब्दसंज्ञानां विषये अर्थस्यैव प्राधान्यं शास्त्रेऽपि, न तु शब्दस्य । 'मृजेर्वृद्धिः' इत्युक्ते वृद्धिपदार्थः आकारः आदेशो भवति, न तु 'वृद्धि'शब्दः ।